# P. R. THAKUR GOVT. COLLEGE
CBSE SEMESTER – V
DSE-1 (SANADSE01T)

## शुक्लयजुर्वेदसंहिता (रुद्राध्यायः)
## षोडशाध्यायः

**TARAK MAJUMDER**

1. रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते ? अत्र कति मन्त्राः सन्ति ?
   रुद्रस्तुतिः शुक्लयजुर्वेदे षोडषाध्याये च वर्तेते। अत्र चतुर्दश मन्त्राः सन्ति।
2. रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः ?
   रुद्रशब्दस्य निर्वचनम् रोदयति इति रुद्रः। रुद् दुःखं द्रावयति इति रुद्रः। रुद्रशब्दस्य अर्थः भीषणः भयङ्करो वेति।
3. 'गिरिशन्त' इति पदसस्य कोऽर्थः ?
   गिरिशन्तः गिरौ पर्वते कैलासाख्ये अवस्थितः शं सुखं तनोतीति गिरिशन्तः। यद्वा गिरिवाच्यवस्थितः सुखं तनोतीनि। यद्वा गिरौ मेघेऽवस्थितो वृष्टिद्वारेण सुखं  तनोतीति इति उवटमतम्।
4. 'यथा ना सर्वज्जगदयक्षमं सुमना असत्' – इत्यस्य किमर्थं कस्य स्तुतिः क्रियते ?
   'यथा नः सर्वमिज्जगदयक्षमं सुमना असत्' – इत्यस्य जगत् अयक्ष्मं तथा शोभनमनस्कं करणाय तदर्थं रुद्रस्य स्तुतिः क्रियते ।
5. रुद्रदेवः ताम्रः 'अरुणश्चे'ति कथमुच्यते ?
   आदित्यरूपेण अत्र रुद्रः स्तूयते। योऽसौ प्रत्यक्षो रुद्रो रविरूपः। रविः उदयकाले ताम्रवर्णः अस्तगमनकाले अरुणवर्णः (रक्तवर्णः) च।
6. 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे' – इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदद्वयोः कः अर्थः ?
   'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे' – इत्यत्र 'नीलग्रीवाय' पदस्य अर्थः नीलकण्ठाय,  'सहस्राक्षाय' पदस्य अर्थः सहस्त्रलोचनाय।
7. रुद्रः कथं 'कपर्दी' इत्युच्यते ? तस्य आयुधद्वयं किम् ?
   रुद्रः कपर्दी इति उच्यते। कपर्दी जटाजुटोऽस्यस्तीति। तस्य आयुधद्वयम् अनातताम्, धृष्टुम् च।
8. रुद्रस्य तनुः कीदृशी आसीत् ?
   रुद्रस्य तनुः शिवा, अघोरा, अपापकाशिनी आसीत्।
9. 'गिरित्र' इति पदस्य कोऽर्थः ?
   गिरित्र पदस्य अर्थः हे पर्वतरक्षक। गिरौ कैलासेऽवस्थितः त्रायते भक्तान् इति गिरित्रः तस्य सम्बोधनं हे गिरित्र।
10. रुद्रसूक्ते ऋषिः कं कं च प्रणमति ?
    रुद्रसूक्ते ऋषि आयुधाय अनातताय धृष्णवे च प्रणमति।
11. शुक्लयजुर्वेदस्य सुप्रसिद्धौ द्वौ भाष्यकारौ कौ ?
    शुक्लयजुर्वेदस्य सुप्रसिद्धौ भाष्यकारौ उवटाचार्यः महीधरश्च।
12. 'अधिवक्ता' इति कस्य विशेषणम् ? कथं च तत्प्रयुज्यते ?

अधिवक्ता इति रुद्रदेवस्य विशेषणम्। ऐश्वर्येणैव यो वदितुं जानाति सोऽधिवक्ता। रुद्रदेवः अधिवक्ता प्रथमो दैव्यो भिषक् अस्माकं सर्वाधिकं वदतु।